योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ११०

दशाधिकशततमः सर्गः ११०

श्रीवसिष्ठ उवाच ।

ततः समुदिते सूर्ये वितमस्यम्बरे स्थिते ।

समुद्गकादिव जगन्मणौ तस्मिन्विनिर्गते ।। १

विकसत्यरुणोपान्ते चक्षुषीवाम्बुजाकरे ।

आचारेष्विव लोकेषु प्रसृतेष्वर्ककरश्मिषु ।। २

दंपती तौ समुत्थाय कृतसंध्याक्रमौ स्थितौ ।

पत्रासने मृदुस्निग्धे कान्तौ काञ्चनकन्दरे ।। ३

अथोत्थायात्र चूडाला रत्नकुम्भं पुरःस्थितम् ।

कान्ता संकल्पयामास पूर्णं सप्ताब्धिवारिभिः ।। ४

तेन मङ्गलकुम्भेन तं पूर्वाभिमुखं स्थितम् ।

भार्या भर्तारमेकान्ते स्वराज्येऽभिषिषेच सा ।। ५

संकल्पोपगते हैमे स्वभिषिक्तं स्वविष्टरे ।

स्थितं प्रोवाच तन्वी सा चूडाला देवरूपिणी ।। ६

केवल मौनमुत्सृज्य तेजः शान्तमिदं प्रभो ।

अष्टानां लोकपालानां तेजस्त्वं भर्तुमर्हसि ।। ७

चूडालयेति संप्रोक्तो वने राजा शिखिध्वजः ।

वदन्नेवं करोमीति महाराजत्वमाययौ ।। ८

अथ प्रतीहारपदे तिष्ठन्तीमाह मानिनीम् ।

अद्य देवीपदे राज्ञीं त्वां करोम्यभिषेकिनीम् ।। ९

इत्युक्त्वा सरसि स्नाप्य महादेवीपदे तथा ।

अभिषिक्तां नृपः कृत्वा स तामाह निजां प्रियाम् ।। १०

प्रिये कमलपत्राक्षि क्षणात्संकल्पसंभवम् ।

महाविभवमुद्दामं सैन्यमाहर्तुमर्हसि ।। ११

इति कान्तवचः श्रुत्वा चूडाला वरवर्णिनी ।

सैन्यं संकल्पयामास प्रावृड्घनमिवोद्धटम् ।। १२

सैन्यं ददृशतुस्तत्तौ वाजिवारणसंकुलम् ।

पताकापूरिताकाशं नीरन्ध्रीकृतकाननम् ।। १३

तूर्यारवध्वनच्छैलगुहागहनकोटरम् ।

मौलिरत्नमहोद्द्योतविचूर्णिततमःपटम् ।। १४

तत्र गन्धद्विपवरे कृतपार्थिवमण्डले ।

रक्षिते हृष्टसामन्तैरारूढौ नृपदंपती ।। १५

ततः शिखिध्वजो राजा महिष्या सममिष्टया ।

पदातिरथसंबाधं कर्षन्नतिवृलो बलम् ।। १६

चचालाचलचालिन्या सेनया स ततो वनात् ।

भिन्दन्निव रसाशैलं वात्ययेवाशु भौमया ।। १७

तस्मान्महेन्द्रशैलेन्द्राच्चलितः स महीपतिः ।

पथि पश्यन्गिरीन्देशान्नदीर्ग्रामान्सजङ्गलान् ।। १८

दर्शयन्स्वप्रियायास्तमात्मवृत्तान्तसंचयम् ।

प्रागल्पेनैव कालेन स्वां पुरीं स्वर्गशोभनाम् ।। १९

तत्र ते तस्य सामन्तास्तदागमनमादृताः ।

विविदुर्जयशब्देन निर्जग्मुश्चोदिताशयाः ।। २०

एकतां संप्रयातेन तारतूर्यनिनादिना ।

बलद्वयेन तेनासौ विवेश नगरं नृपः ।। २१

लाजपुष्पाञ्जलिव्रातैरावृष्टः पौरयोषिताम् ।

वणिङ्मार्गमसौ पश्यन्परंपरमनुत्तमम् ।। २२

पताकाध्वजसंबाधं मुक्ताजालमनोरमम् ।

नृत्यगेयपरस्त्रीकं स्वभूमावचलं स्थितम् ।। २३

प्रविश्याथ गृहं तैस्तैः संयुतं नृपमङ्गलैः ।

सम्यक्संमानयामास प्रणतं प्रकृतिव्रजम् ।। २४

पुरोत्सवं भृशं कृत्वा दिनसप्तकमुत्तमम् ।

अकरोद्राजकार्याणि स्वानि स्वान्तःपुरे नृपः ।। २५

दशवर्षसहस्राणि राज्यं कृत्वा महीतले ।

सहचूडालया राम विरतो देहधारणात् ।। २६

देहमुत्सृज्य निर्वाणमस्नेह इव दीपकः ।

अपुनर्जन्मने राम जगामेति महामतिः ।। २७

दशवर्षसहस्राणि समदृष्टितया तया ।

राज्यं तयाऽऽरमय्यापि निर्वाणं पदमाप्तवान् ।। २८

विगतभयविषादो मानमात्सर्यमुक्तः

प्रकृतसहजकर्मा भुक्तनीरागबुद्धिः ।

इति समसमदृष्टिर्मृत्युमार्योऽथ जित्वा

दशशिशिरसहस्राण्येकराज्यं चकार ।। २९

भुक्त्वा भोगाननेकान्भुवि सकलमहीपालचूडा-

मणित्वे

स्थित्वा वै दीर्घकालं परममृतपदं प्राप्तवान्सत्त्वशेषः ।

एवं रामागतं त्वं प्रकृतमनुसरन्कार्यजातं विशोक-

स्तिष्ठोत्तिष्ठ स्वयं वा प्रसभमनुभवन्भोगमोक्षादि-

लक्ष्मीः ।। ३० ।।

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे०मो० निर्वाणप्रकरणे पू० चू० शिखिध्वजनिर्वाणं नाम दशोत्तरशततमः सर्गः ।। ११० ।।

चूडालोपाख्यानं समाप्तम् ।